एतस्वपि चाद्यासु श्लेष्मलिङ्गाच्छ्रयो भवेत् ॥
अनार्त्तवास्तनी षण्डी खरस्पर्शा च मैथुने ॥'
अस्तनी ईषत् स्तनौ यस्याः सा अत्र लक्ष्या षण्डी । अण्डिनीमाह ।
'महामेढ्रगृहीताया बालाया अण्डिनी भवेत् ॥'
महामेढ्रः पुरुषः तेन गृहीताया बालायाः सूक्ष्मयोनिच्छिद्राया अण्डिनी अण्डवल्लम्बमाना योनिर्भवति ।
'विवृतातिमहायोनिः सूचीवक्त्रातिसंवृता ।
सर्व्वलिङ्गसमुत्थानात् सर्व्वदोषप्रकोपजा ।
चतसृष्वपि चाद्यासु सर्व्वलिङ्गनिदर्शनम् ॥'
असाध्या योनीराह ।
'पञ्चासाध्या भवन्तीह योनयः सर्व्वदोषजाः ॥'
पञ्च षण्डीप्रभृतयः ॥ * ॥
अथ योनिकन्दस्य निदानमाह ।
'दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्व्वाताद्याः कुपिता यथा ॥'
वाताद्याः कुपिता यथा यथा निदानकुपिता वाताद्याः ॥ * ॥ रूपमाह ।
"पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् ।
जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः ॥"
लकुचाकृतिसन्निभं लकुचाकाराकारम् । गुड़कमत्र विशेष्यं बोद्धव्यम् ॥ * ॥ वातजादिभेदेन रूपभेदमाह ।
"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् ।
दाहरागज्वरयुतं विद्यात् पित्तात्मकं तु तम् ॥
तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम् ।
सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं भवेत् ॥"* ॥
अथ योनिरोगाणां चिकित्सा । तत्र वन्ध्याचिकित्सा । तस्या लक्षणमाह । वन्ध्या नष्टार्त्तवा ज्ञेयेति । ततः प्रथमतो नष्टार्त्तवाचिकित्सा ।
'आर्त्तवादर्शने नारी मत्स्यान् सेवेत नित्यशः ।
काञ्जिकञ्च तिलान् माषानुदश्विच्च तथा दधि ॥
इक्ष्वाकुबीजदन्तीचपलागुड़दमनकिण्वयवशूकैः ।
सस्नुक्क्षीरैर्व्वर्त्तिर्योनिगता कुसुमसञ्जननी ॥'
इक्ष्वाकुः कटुतुम्बी । चपला पिप्पली । दमनो मदनफलम् । किण्वं सुराबीजम् ।
'पीतं ज्योतिष्मतीपत्रं राजिकोग्रासनं त्र्यहम् ।
शीतेन पयसा पिष्टं कुसुमं जनयेद्ध्रुवम् ॥'
ज्योतिष्मती कटभीवृक्षविशेषः करही इति लोके । पयसा दुग्धेन ॥ * ॥ अथ वन्ध्याचिकित्सा ।

'बला सिता सातिबला मधूकं
वटस्य शुङ्गं गजकेशरञ्च ।
एतन्मधुक्षीरघृतैर्निपीय
वन्ध्या सुपुत्रं नियतं प्रसूते ॥

अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम् ।
ऋतुस्नाताङ्गना प्रातः पीत्वा गर्भं दधाति हि ।
पुष्योद्धृतं लक्ष्मणाया मूलं दुग्धेन कन्यया ।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः ॥
कुरण्टमूलं धातक्या कुसुमानि वटाङ्कुराः ।
नालोत्पलं पयोयुक्तमेतद्गर्भप्रदं ध्रुवम् ॥

यावत्ता पिबति पार्श्वपिप्पलं
जीरकेण सहितं हिताशना ।
श्वेतया विशिखपुङ्खया युतं
सा सुतं जनयतीह नान्यथा ॥"

श्वेतकुसुमया शरपुंखया सह ।
"पत्रमेकं पलाशस्य पिष्ट्वा दुग्धेन गर्भिणी ।
पीत्वा पुत्त्रमवाप्नोति वीर्य्यवन्तं न संशयः ॥
शूकरशिम्बीमूलं मध्यं वा दधि फलस्य सपयस्कम्
पीत्वाथोभयलिङ्गीबीजं कन्यां न सूते स्त्री ॥
पुत्त्रमजारीमूलं विष्णुक्रान्तेशालिङ्गिनीसहिता ।
एतत् गर्भेऽष्टदिनं पीत्वा कन्यां न सर्व्वथा सूते ॥
पुत्त्रमजारी पतजिया तस्या मूलम् । ईशालिङ्गिनी पञ्चगुरिया ॥ * ॥ गर्भप्रदभेषजकथनावसरे गर्भाजनकमपि भेषजमाह ।
'पिप्पलीविड़ङ्गटङ्कणसमचूर्णं या पिबेत् पयसा ।
ऋतुसमये नहि तस्या गर्भः संजायते क्वापि ॥

आरनालपरिपेषितं त्र्यहं
या जयाकुसुममत्ति पुष्पिणी ।
सतुपुराणगुड़मुष्टिसेविनी
सा दधाति नहि गर्भमङ्गना ॥ * ॥

तासु योनिषु चाद्यासु स्नेहादिक्रम इष्यते ।
वस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम् ॥'
वस्तिरत्रोत्तरवस्तिः । क्रमश्चिकित्सा ।
'नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः ।
तिलतैलं पचेन्नारी पिचुं तस्य विधारयेत् ॥
विप्लुतायां सदा योनौ व्यथा तेन प्रशाम्यति ॥'
नतं तगरम् ।
'वातलां कर्क्कशां स्तब्धामल्पस्पर्शां तथैव च ।
कुम्भीस्वेदैरुपचरेदन्तर्व्वेश्मनि संवृते ॥
धारयेद्वा पिचुं योनौ तिलतैलस्य सा सदा ।
पित्तलानाञ्च योनीनां सेकाभ्यङ्गपिचुक्रियाः ॥
शीताः पित्तहराः कार्य्याः स्नेहनार्थं घृतानि च ।
प्रसंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत् ॥
पिधाय वेशवारेण ततो बन्धं समाचरेत् ।
शुण्ठीमरिचकृष्णाभिर्धान्यकाजाजिदाड़िमैः ॥
पिप्पलीमूलसंयुक्तैर्व्वेशवारः स्मृतो बुधैः ॥
धात्रीरसं सितायुक्तं योनिदाहे पिबेत् सदा ।
सूर्य्यक्रान्ताभवं मूलं पिबेद्वा तण्डुलाम्बुना ॥
योन्यान्तु पूयस्राविण्यां शोधनद्रव्यनिर्म्मितैः ।
सगोमूत्रैः सलवणैः पिण्डैः संपूरणं हितम् ॥'
शोधनद्रव्याणि निम्बपत्रादीनि ।
'दुर्गन्धां पिच्छिलां वापि चूर्णैः पञ्चकषायजैः ।
पूरयेद्धारयेद्राजवृक्षादिक्वथिताम्बुना ॥"
पञ्च कषायाः । वचावासापटोलप्रियङ्गुनिम्बाः ।
राजवृक्षादि धनवहेरा ।
"पिप्पल्यामरिचैर्माषैः शताह्वाकुष्ठसैन्धवैः ।
वर्त्तिस्तुल्या प्रदेशिन्या योनौ श्लेष्मविशोधिनी ॥
तुल्या प्रदेशिन्या दैर्घ्येण परिणाहेन च ।
कर्णिन्यां वर्त्तयो देयाः शोधनद्रव्यनिर्म्मिताः ॥
गुड़ूचीत्रिफलादन्तीक्वथितोदकधारया ।
योनिं प्रक्षालयेत्तेन तत्र कण्डूः प्रशाम्यति ॥
सुमपुष्पं सखदिरं पथ्यां जातीफलं तथा ।
निम्बीं पूगञ्च संचूर्ण्य वस्त्रपूतं क्षिपेद्भगे ।
योनिर्भवति संकीर्णा न स्रवेच्च जलं ततः ॥
कपिकच्छूभवं मूलं क्वाथयेद्विधिना भिषक् ।
योनिः सङ्कीर्णतां याति क्वाथेनानेन धावनात् ॥
जीरकद्वितयं कृष्णा सुषवी सुरभिर्व्वचा ।
वासकः सैन्धवञ्चापि यवक्षारो यवानिका ॥
एषां चूर्णं घृते किञ्चित् भृष्ट्वा खण्डेन मोदकम् ।
कृत्वा खादेद्यथावह्नि योनिरोगाद्विमुच्यते ॥
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला ।
मेदे पयस्या काकोली मूलञ्चैवाश्वगन्धजम् ॥
अजमोदा हरिद्रे द्वे प्रियङ्गुकटुरोहिणी ।
उत्पलं कुमुदं द्राक्षा काकोल्यौ चन्दनद्वयम्
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
शतावरीरसं क्षीरं घृताज्ज्ञेयं चतुर्गुणम् ।
सर्पिरेतन्नरः पीत्वा स्त्रीषु नित्यं वृषायते ।
पुत्त्रान् जनयते वीरान् मेधाढ्यान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् पुत्त्रं वा जनयेन्मृतम् ।
अल्पायुषं वा जनयेत् या च कन्यां प्रसूयते ॥
योनिरोगे रजोदोषे परिस्रावे च शस्यते ।
प्रजावर्द्धनमायुष्यं सर्व्वग्रहनिवारणम् ।
नाम्ना फलघृतं ह्येतदश्विभ्यां परिवर्त्तितम् ॥
अनुक्तं लक्ष्मणामूलं क्षिपन्त्यत्र चिकित्सकाः ।
जीवद्वत्सैकवर्णाया घृतञ्चात्र प्रयुज्यते ।
अरण्यगोमयेनेह वह्निज्वाला च दीयते ॥'
मेदे मेदा महामेदा तयोरभावे शतावरी द्विगुणा देया । पयस्यात्र क्षीरकाकोली काकोलीयुगलाभावे अश्वगन्धा द्विगुणा देया । प्रियङ्गुस्थाने केचिद्धिङ्गु पठन्ति । पयस्या काकोलीत्युक्ता पुनः काकोल्याविति काकोलीक्षीरकाकोल्यौ द्वैगुण्यार्थं एतस्य फलघृतस्य पाठो नानातन्त्रेषु नानाविधः । तत्र हिङ्गुवचातगरजीवकर्षभका एवाधिकाः । तत्र जीवकर्षभयोरभावे विदारीकन्दो द्विगुणो देयः । फलघृतं सकलयोनिरोगेषु ॥ * ॥

अथ योनिकन्दस्य चिकित्सा ।

'गैरिकाम्रास्थिजन्तुघ्नरजन्यञ्जनकट्फलम् ।
पूरयेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः ॥
त्रिफलायाः कषायेण सक्षौद्रेण च सेचयेत ।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते ॥'
अथ प्रसङ्गात् गुर्व्विण्या रोगाणां चिकित्सा ।
'ह्रीवेरातिविषामुस्तमोचशक्रैः शृतं जलम् ।
दद्याद्गर्भे प्रचलिते प्रदरे कुक्षिरुज्यपि ॥'
कुक्षिरुक् उदरव्यथा । चलितगर्भस्थापने ह्रीवेरादिक्वाथः ॥ * ॥

अथ गर्भस्रावपातयोर्निदानम् ।

'ग्राम्यधर्म्माध्वगमनयानासनप्रपीड़नैः ।
ज्वरोपवासोत्पतनप्रहाराजीर्णधावनैः ॥
वमनाच्च विरेकाच्च कुन्थनाद्गर्भपातनात् ।
तीक्ष्णक्षारोष्णकटुकतिक्तरूक्षनिषेवणात् ॥
वेगाभिघाताद्विषमादासनाच्छयनाद्भयात् ।
गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत् ॥'